'समानो मन्त्रः समितिः समानी'

# UNIVERSITY OF NORTH BENGAL

B.A. Honours 5th Semester Examination, 2023

## CC11-SANSKRIT (511)

Time Allotted: 2 Hours — Full Marks: 60

*The figures in the margin indicate full marks.*

**All answer should be written in Sanskrit with Devanagari.**

**UNIT-I**

1. भूमिसुक्तमाधारीकृत्य प्रबन्धः लेखनीयः। 12×1 = 12

अथवा

संज्ञानसूक्तस्य मूलतात्पर्यमालोचयत।

2. संस्कृतभाषया देवनागरीलिप्या च व्याख्या कार्या (***एकस्य***) — 6×1 = 6

(क) हिरण्यगर्भः समवर्तताग्रे
भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां
कस्मै देवाय हविषा विधेम॥

(ख) अग्निः पूर्वेभिर्ऋषिभि-
रीड्यो नूतनैरुत।
स देवाँ एह वक्षति॥

3. अनुवादः कार्यः (***एकस्य***) — 3×1 = 3

(क) उप त्वाग्ने दिवेदिवे
दोषावस्तर्धिया वयम्
नमो भरन्त एमसि॥

(ख) यं क्रन्दसी अवसा तस्तभाने
अभ्यैक्षेतां मनसा रेजमाने।
यत्राधि सूर उदितो विभाति
कस्मै देवाय हविषा विधेम॥

4. व्याख्या कार्या — 6×1 = 6

तत्र अग्निमोळे इति सूक्तं प्रातरनुवाक आग्नेये क्रतौ विनियुक्तम्।

अथवा

अग्नीषोमप्रणयणे 'उप त्वाग्ने' इत्यादिकोऽनुवचनीयस्तृचः।

5. संक्षिप्तमुत्तरं लेखनीयम् (***त्रयाणाम्***) — 1×3 = 3

(क) ऋग्वेदस्य प्रथममण्डलस्य प्रथमसूक्तस्य नाम किम् ?

(ख) 'य आत्मदा बलदा'— इति मन्त्रांशः कुत्र वर्तते ?

(ग) संज्ञानसुक्तस्य ऋषिः कः ?

(घ) 'स नः पितेव सूनवे'— मन्त्रांशस्य ऋषिः कः ?

## UNIT-II

6. मनुमत्स्यकथा आलोचनीया। 12×1 = 12

अथवा

शुनःशेपकथायाः सामाजिकगुरुत्वम् आलोचनीयम्।

7. संक्षिप्तमुत्तरं लेखनीयम् (***त्रयाणाम्***) — 1×3 = 3

(क) मनुमत्स्यकथायाः उत्सः कः ?

(ख) हरिश्चन्द्रः कः आसीत् ?

(ग) अजीगर्तऋषेः कति पुत्राः आसन् ?

(घ) 'मनवे ह वै प्रातः'— इति कुत्र विद्यते ?

## UNIT-III

8. पदपाठः प्रदर्श्यताम् [Q. No. 2 (ख) अथवा 3 (क)] 6×1 = 6

9. लेट्-प्रयोगस्य वैशिष्ट्यं प्रतिपादयत। 6×1 = 6

अथवा

वैदिक प्रयोगे उपसर्गाणां वैशिष्ट्यं प्रतिपादयत।

10. व्युत्पत्तिं प्रदर्शयत (***त्रयाणाम्***) — 1×3 = 3

समवर्तताग्रे, विधेम, ईड्यः, वक्षति, देवेभिः।

——×——